श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ षष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ षष्टितमः सर्गः ॥

## लङ्कां जित्वा सीताया आनयनार्थमङ्गदस्योत्साहसमन्वितो विचारो जाम्बवता तस्य निवारणं च

तस्य तद् वचनं श्रुत्वा वालिसूनुरभाषत।
अश्विपुत्रौ महावेगौ बलवन्तौ प्लवङ्गमौ ॥ **5.60.1** ॥

पितामहवरोत्सेकात् परमं दर्पमास्थितौ।
अश्विनोर्माननार्थं हि सर्वलोकपितामहः ॥ **5.60.2** ॥

सर्वावध्यत्वमतुलमनयोर्दत्तवान् पुरा।
वरोत्सेकेन मत्तौ च प्रमथ्य महतीं चमूम् ॥ **5.60.3** ॥

सुराणाममृतं वीरौ पीतवन्तौ महाबलौ।
एतावेव हि सङ्क्रुद्धौ सवाजिरथकुञ्जराम् ॥ **5.60.4** ॥

लङ्कां नाशयितुं शक्तौ सर्वे तिष्ठन्तु वानराः।
अहमेकोऽपि पर्याप्तः सराक्षसगणां पुरीम् ॥ **5.60.5** ॥

तां लङ्कां तरसा हन्तुं रावणं च महाबलम्।
किं पुनः सहितो वीरैर्बलवद्भिः कृतात्मभिः ॥ **5.60.6** ॥

कृतास्त्रैः प्लवगैः शक्तैर्भवद्भिर्विजयैषिभिः।
वायुसूनोर्बलेनैव दग्धा लङ्केति नः श्रुतम् ॥ **5.60.7** ॥

दृष्ट्वा देवी न चानीता इति तत्र निवेदितुम्।
न युक्तमिव पश्यामि भवद्भिः ख्यातपौरुषैः ॥ **5.60.8** ॥

नहि वः प्लवने कश्चिन्नापि कश्चित् पराक्रमे।
तुल्यः सामरदैत्येषु लोकेषु हरिसत्तमाः॥ **5.60.9** ॥

जित्वा लङ्कां सरक्षौघां हत्वा तं रावणं रणे।
सीतामादाय गच्छामः सिद्धार्था हृष्टमानसाः॥ **5.60.10** ॥

तेष्वेवं हतवीरेषु राक्षसेषु हनूमता।
किमन्यदत्र कर्तव्यं गृहीत्वा याम जानकीम्॥ **5.60.11** ॥

रामलक्ष्मणयोर्मध्ये न्यस्याम जनकात्मजाम्।
किं व्यलीकैस्तु तान् सर्वान् वानरान् वानरर्षभान्॥ **5.60.12** ॥

वयमेव हि गत्वा तान् हत्वा राक्षसपुङ्गवान्।
राघवं द्रष्टुमर्हामः सुग्रीवं सहलक्ष्मणम्॥ **5.60.13** ॥

तमेवं कृतसङ्कल्पं जाम्बवान् हरिसत्तमः।
उवाच परमप्रीतो वाक्यमर्थवदर्थवित्॥ **5.60.14** ॥

नैषा बुद्धिर्महाबुद्धे यद् ब्रवीषि महाकपे।
विचेतुं वयमाज्ञप्ता दक्षिणां दिशमुत्तमाम्॥ **5.60.15** ॥

नानेतुं कपिराजेन नैव रामेण धीमता।
कथञ्चिन्निर्जितां सीतामस्माभिर्नाभिरोचयेत्॥ **5.60.16** ॥

राघवो नृपशार्दूलः कुलं व्यपदिशन् स्वकम्।
प्रतिज्ञाय स्वयं राजा सीताविजयमग्रतः॥ **5.60.17** ॥

सर्वेषां कपिमुख्यानां कथं मिथ्या करिष्यति।
विफलं कर्म च कृतं भवेत् तुष्टिर्न तस्य च॥ **5.60.18** ॥

वृथा च दर्शितं वीर्यं भवेद् वानरपुङ्गवाः।
तस्माद् गच्छाम वै सर्वे यत्र रामः सलक्ष्मणः।
सुग्रीवश्च महातेजाः कार्यस्यास्य निवेदने॥ **5.60.19**॥

न तावदेषा मतिरक्षमा नो
　　यथा भवान् पश्यति राजपुत्र।
यथा तु रामस्य मतिर्निविष्टा
　　तथा भवान् पश्यतु कार्यसिद्धिम्॥ **5.60.20**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्टितमः सर्गः॥